विघाते चुरादि सेट्।) दृक्क्षयो दृष्टिरहिती-
भावः। तेनाकर्म्मकोऽयं। सत्ताजीवनदर्पभीति-
शयनक्रीड़ानिवासच्चयाख्यानभोगतिस्थिति-
जरालज्जाप्रमादोदये। मोहे खोटनवेगयुद्धदहन-
ख्यातिज्वरोन्मादके शुद्धिस्वेदपलायनभ्रमणके
शान्तौ श्रुतौ मज्जने॥ दृप्तौ जागरशोषवक्रगम-
नोल्लासेहे म्लतौ संशये ग्लानौ मन्दगतौ च न्वय-
पतने चेष्टाक्रुधौ रोदने। वृद्धौ ह्रावनतौ च
सिद्धिविरतौ हर्षोपवेशे बले कम्पोद्वेगनिमेषभङ्ग-
यतनाद्ये धातवोऽकर्म्मकाः॥ दौर्बल्यादिषु चा-
र्थेषु वर्त्तमानास्तु धातवः। वाचका भावमात्रस्य
यतस्तस्मादकर्म्मकाः॥ कौटिल्यादिषु चार्थेषु प्रोक्ता
ये ते तु धातवः। तद्भावेऽकर्म्मकाः स्युस्तद्वत्-
त्तायां सकर्म्मकाः॥ इति। अन्धयति अन्धापयति
वृद्धः। इति दुर्गादासः॥

अन्धं, क्ली, (अन्ध + अच्।) अन्धकारः।
("सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा"।
इति उत्तरचरिते।) जलं। इति मेदिनी।

अन्धः, त्रि, (अन्ध + अच्।) चक्षुर्द्दयहीनः। आन्धा
आँधला इति हिन्दी भाषा। तत्पर्य्यायः। अ-
दृक् २। इत्यमरः। ("वृद्धोऽन्धः पतिरेष मञ्चक-
गतः"। इति साहित्यदर्पणे।
"अन्धो मत्स्यानिवाश्नाति स नरः कण्टकैः सह।
यो भाषतेऽर्थवैकल्यमप्रत्यक्षं सभाङ्गतः"।
इति मनुः।)

अन्धः, [स्] क्ली, (अन्ध + असुन्।) अन्नं। इत्य-
मरः॥

अन्धकः, पुं, (अन्ध + ण्वुल्।) देशभेदः। इति
शब्दरत्नावली॥ नृपभेदः।
("सुदंष्ट्रं च सुचारुं च कृष्णमित्यन्धकास्त्रयः"।
इति हरिवंशे।) असुरभेदः। इति महाभारतं॥
("स व्रजत्यन्धवद्यस्मादनन्धोऽपि हि भारत।
तमन्धकोऽयं नाम्नेति प्रोचुस्तत्र निवासिनः"।
इति हरिवंशे।) मुनिविशेषः। इति याज्ञ-
वल्क्यः॥ (दृष्टिहीनः। चक्षुर्द्दयहीनः।
"अन्धकः कुब्जकश्चैव राजकन्या च त्रिस्तनी।
त्रयोऽप्यन्यायतः सिद्धाः सम्मुखे कर्म्मणि स्थिते"॥
इति पञ्चतन्त्रे।)

अन्धकरिपुः, पुं, (अन्धकस्य असुरस्य रिपुः नाशक-
तया शत्रुः, षष्ठीतत्पुरुषः।) शिवः। इत्यमरः॥
श्लेषकाव्यादौ अन्धकारनाशकत्वात् सूर्य्याग्नि-
चन्द्रेषु च वर्त्तते॥

अन्धकारः, पुं, क्ली, (अन्धमन्धकवत् करोति, अन्ध
+ कृ + अण्।) तेजःसामान्याभावः। आँधार
इति भाषा। तत्पर्य्यायः। ध्वान्तं २ तमिस्रं ३
तिमिरं ४ तमः ५। इत्यमरः॥ ("अथान्धकारं
गिरिगह्वराणां"। इति रघुवंशे।) भूच्छायं ६।
इति राजनिर्घण्टः॥ महान्धकारे अन्धतमसं।
७ सर्व्वव्यापकान्धकारे सन्तमसं। ८ अल्पान्धकारे
अवतमसं ९। इत्यमरः॥ अस्य गुणाः। भयदृष्टि-
तेजोऽवरोधकारित्वं। तिक्तत्वं। सर्व्वव्याधिकर-
त्वञ्च। इति राजवल्लभः।

अन्धकासुहृद्, पुं, (अन्धकस्य असुरस्य असुहृत्,
नाशकतया शत्रुः, षष्ठीतत्पुरुषः।) शिवः। इति
हेमचन्द्रः॥

अन्धकूपः, पुं, (अन्धमन्धकारं करोति, अन्ध + करो-
त्यर्थे णिच् + पचाद्यच्, तादृशः कूपः।) सान्ध-
कारकूपः। इति त्रिकाण्डशेषः॥ आँधुया पातुया
इति भाषा।
("मज्जत्यात्मा भक्तिहीनो महामोहमये भवे।
अन्धकूपे निरालम्बश्छिन्नरज्जुर्यथा घटः"॥
इति सद्भावे।)

अन्धतमसं, क्ली, (अन्धयति, अन्ध + अच्, अन्धं
तमः कर्म्मधारयः, समासान्त अच्।) निविड़ा-
न्धकारं। इत्यमरः॥
("प्रध्वंसितान्धतमसस्तत्रोदाहरणं रविः"।
इति शिशुपालवधे।)

अन्धतामसं, क्ली, (तम एव तामसं प्रज्ञादित्वात्
स्वार्थे अण्।) निविड़ान्धकारं। महान्धकारं।
इत्यमरटीकायां स्वामी॥

अन्धतामिस्रं, क्ली, (तमिस्रैव तामिस्रं, स्वार्थे अण्,
अन्धं निविड़ं तामिस्रं कर्म्मधारयः।) निविड़ा-
न्धकारमयनरकविशेषः। पञ्चप्रकाराज्ञानान्तर्ग-
ताज्ञानविशेषः। देहनाशे अहमेव मृतोऽस्मीति
बुद्धिः। इति भारतभागवते,—
("एकविंशतिविधनरकान्तर्गतद्वितीयनरकवि-
शेषः" स च निविड़ान्धकारमयः। "तस्यां धर्म्म-
पत्नीमन्धतामिस्रमभ्यध्यायत्"। इति महावीर-
चरिते।)

अन्धमूषिका, स्त्री, (अन्ध दृष्टिविघाते, अन्ध + भावे
घञ्, अन्धं दृष्टिविघातं मुष्णाति तत्सेवनेन नाश-
यति, मुष + ण्वुल् पृषोदरादित्वात् दीर्घः स्त्रियां
टाप्।) देवताड़वृक्षः। इति शब्दचन्द्रिका॥

अन्धाहिः, पुं, स्त्री, (अन्धः अहिः सर्प इव।) मत्स्य-
भेदः। इति त्रिकाण्डशेषः॥ कुँचिया इति ख्यातः।

अन्धिका, स्त्री, (अन्ध + ण्वुल् स्त्रियां टाप्।) द्यूत-
विशेषः। रात्रिः। इति मेदिनी॥ सर्षपी। इति
हेमचन्द्रः॥ स्त्रीविशेषः। चक्षूरोगविशेषः। इति
शब्दरत्नावली॥

अन्धुः, पुं, (अन्ध + उण्।) कूपः। इत्यमरः॥

अन्धुलः, पुं, (अन्ध + उलच्।) शिरीषवृक्षः इति
शब्दचन्द्रिका॥

अन्ध्रः, पुं, (अन्धयति गीतेन मृगान् अन्धवत्
करोति, अन्ध + कर्त्तरि रः।) व्याधः। मृगया-
जीवी। इति कश्चित् संग्रहकारः। (वैदेहिकात्
कारावरस्त्रियां जातो जातिविशेषः, स तु सततं
ग्रामवहिर्वासी मृगयाजीवी च।
"कारावरनिषादात् तु चर्म्मकारः प्रसूयते।
वैदेहिकादन्ध्रमेदौ वहिर्ग्रामप्रतिश्रयौ"॥
इति मनुः।)

अन्नं, क्ली, (अद् + कर्म्मणि क्तः।) स्विन्नतण्डुलं।
यथा,—
"शस्यं क्षेत्रगतं प्राहुः सतुषं धान्यमुच्यते।
आमं वितुषमित्युक्तं स्विन्नमन्नमुदाहृतं"॥
इति श्राद्धतत्त्वधृतवशिष्ठवचनं॥ तत्पर्य्यायः।
भक्तं २ अन्धः ३ भिस्सा ४ ओदनं ५ दीदिविः ६।
इत्यमरः॥ भिस्सा ७। इति तट्टीका॥ कूरं ८।
इति राजनिर्घण्टः॥ अट्टं ९ कशिपुः १० जीवातुः
११। इति जटाधरः॥ कूरं १२ आपूपिकं १३
जीवन्तिः १४ प्रसादनं १५। इति शब्दरत्ना-
वली॥ * ॥ अस्य गुणाः। बुद्धिसुखप्रीतिपुष्टि-
धात्विन्द्रियबलकारित्वं। गुरुत्वं। क्षुधाक्षयरोग-
श्रमकार्श्यनाशित्वञ्च॥ * ॥ नवान्नगुणाः। श्लेष्म-
कारित्वं। स्वादुत्वं। सुस्निग्धत्वं। वृंहणत्वं। गुरु-
त्वञ्च॥ * ॥ पुराणान्नगुणाः। विरसत्वं। रूक्षत्वं।
पथ्यत्वं। अग्निकारित्वञ्च॥ * ॥ उष्णान्नगुणाः।
प्रशंसनीयत्वं। हृद्यत्वं। अग्निकारित्वं। वायुश्लेष्म-
नाशित्वं। रक्तपित्तप्रकोपकारित्वञ्च॥ * ॥ अत्यु-
ष्णान्नगुणाः। बलनाशित्वं॥ * ॥ शीतशुष्कान्नयो-
र्गुणाः। दुर्ज्जरत्वं॥ * ॥ अतिक्लिन्नान्नगुणाः। ग्लानि-
कारित्वं॥ * ॥ तण्डुलान्वितान्नगुणाः। दुर्जरत्वं॥ * ॥
जलधौतसद्योऽन्नगुणाः। शीघ्रपाकित्वं। हिमत्वं।
लघुत्वञ्च॥ * ॥ रात्रिस्थितजलयुक्तान्नगुणौ। त्रि-
दोषकोपकारित्वं। रूक्षत्वञ्च॥ * ॥ भृष्टतण्डुलान्न-
गुणौ। लघुत्वं। अग्निप्रदीपनत्वञ्च। इति राज-
वल्लभः॥ * ॥ धान्यं। इति राजनिर्घण्टः॥ विष्णुः।
इति तस्य सहस्रनाममध्ये पठितं॥ अदनीयद्रव्य-
मात्रं॥ अन्नसाधनं यथा,—
"सुधौतांस्तण्डुलान् स्फीतांस्तोये पञ्चगुणे पचेत्।
तद्भक्तं प्रस्रुतं चोष्णं विषदं गुणवन्मतं"॥
तद्गुणाः।
"भक्तं वह्निकरं पथ्यं तर्पणं रोचनं लघु।
अधौतमसृतं शीतं गुर्व्वरुच्यं कफप्रदं"॥
इति भावप्रकाशः॥ * ॥ तद्दानफलं यथा,—
"वारिदस्तृप्तिमायाति सुखमक्षय्यमन्नदः"॥
अन्नस्य प्रजापतिर्द्देवता। अक्षयसुखप्राप्तिः फलं।
प्रतिग्रहे मुष्टिग्रहणं। इति शुद्धितत्त्वं॥ अपि च,
"ब्रह्महत्याकृतं पापं अन्नदानात् प्रणश्यति।
अन्नदः पापकर्म्मापि पूतः स्वर्गे महीयते"॥
इति प्रायश्चित्ततत्त्वं॥ * ॥ अथ प्रजापतिदैवतान्न
दानावर्त्तः। तत्र अन्नदानस्तुतिः। ब्रह्मपुराणे।
"अन्ने प्रतिष्ठिता लोका अन्नमाश्रयणं परं।
तस्मादन्नं प्रशंसन्ति सदैव पितृमानवाः॥
अन्नस्य हि प्रदानेन नरो याति परां गतिं।
सर्व्वकामसमायुक्तः प्रेत्य चेहाधिकं शुभं"॥
तथा,—
"अन्नमूर्ज्जस्करं लोके दत्त्वोर्ज्जस्वी भवेन्नरः।
सतां पन्थानमाश्रित्य सर्व्वपापैः प्रमुच्यते"॥
महाभारते।
"अन्नदः पशुमान् पुत्त्री धनवान् भोगवानपि।
प्राणवांश्चापि भवति रूपवांश्च तथा नृप"॥
तथा,—
"अन्नदस्य मनुष्यस्य बलमोजो यशांसि च।
कीर्त्तिश्च वर्द्धते शश्वत्त्रिषु लोकेषु पाण्डव"॥
आग्नेयपुराणे। अन्नस्तुतनन्तरं।
"तस्मादन्नं सदा देहि श्रद्धया नृपसत्तम।